# संस्कृतवार्ता:

दिनाङ्क : 20/02/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

<u>आदौ मुख्यवार्ताः</u>

- प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य नवदिल्ल्याम् एनडीए इत्येतस्या: संयुत्या: मुख्यमन्त्रिभि: उपमुख्यमन्त्रिभि: च सह उपवेशनस्य अध्यक्षतां कृतवान्।
- भारतीय-जनता-पार्टीति दलस्य प्रथमवारस्य विधायक-पदासीना रेखा गुप्ता अद्य दिल्ल्या: 'रामलीला मैदान' इत्यत्र दिल्ल्या: मुख्यमन्त्रित्वेन शपथवचनं स्वीकृतवती। सहैव षड् मन्त्रिमण्डलसदस्या: शपथवचनं स्वीकृतवन्त:।
- भारत-बाङ्गलादेश-सीमा-समन्वय-सम्मेलनावधौ सीमापारापराधेषु सीम्नि वेष्टनं इत्यादिषु विषयेषु उभयो: देशयो: मध्ये विस्तृता व्यापकी च चर्चा समनुष्ठिता।
- केन्द्रप्रशासनेन त्रिंशद्-वयोवर्गात् अधिकायुवर्गाणां जनेषु सञ्चारेतर-रोगाणां निरीक्षणाय राष्ट्रव्यापि-अभियानं समारब्धम्।
- पुरुष क्रिकेट्-क्रीडायां आई०सी०सी० चैम्पियन्स् ट्रॉफी इति स्पर्धायां भारत-बाङ्गलादेशयोर्मध्ये द्वन्द्वं प्रचलति। यत्र बाङ्गलादेशदलेन प्रथमं तावत् नवविंशत्यधिकद्विशतधावनाङ्कानाम् लक्ष्यं स्थापितं।

------------------------------------------

<u>प्रधानमन्त्रि – मुख्यमन्त्री-उपवेशन</u>

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य नवदिल्ल्यां एनडीए इत्येतस्या: संयुत्या: मुख्यमन्त्रिभि: उपमुख्यमनत्रिभि: च सह उपवेशनस्य अध्यक्षतां कृतवान्। उपवेशने केन्द्रीयमन्त्रिण: अमितशाह:, राजनाथसिंह:, जेपी नड्डा: च उपस्थिता: आसन्। उपवेशनेऽस्मिन् महाराष्ट्रस्य

मुयमन्त्री देवेन्द्र-फडणवीस, उपमुख्यमन्त्री एकनाथ-शिन्दे, अजीतपवार:, आन्ध्रप्रदेशस्य मुख्यमन्त्री चन्द्रबाबू-नायडू:, उपमुख्यमन्त्री, पवन-कल्याण:, ओडिशाया: मुख्यमन्त्री मोहन-चरण-माञ्झी, मध्यप्रदेशस्य मुख्यमन्त्री मोहनयादव:, राजस्थानस्य मुख्यमन्त्री भजनलाल शर्मा, दिल्ल्या: मुख्यमन्त्री रेखा गुप्ता, उत्तरप्रदेशस्य उपमुख्यमन्त्री केशव-प्रसाद-मौर्य: बिहारस्य उपमुख्यमन्त्री विजय-सिन्हा: तथा च नैके जना: सम्मिलिता: आसन्।

------------------------------------------

<u>दिल्ली-मुख्यमन्त्री</u>

भारतीय-जनता-पार्टीति दलस्य प्रथमवारस्य विधायक-पदासीना रेखा गुप्ता अद्य दिल्ल्या: रामलीला मैदान इत्यत्र दिल्ल्या: मुख्यमन्त्रित्वेन शपथवचनं स्वीकृतवती। उपराज्यपाल: विनयकुमार-सक्सेना तां पदगोपनीयताया: शपथं आकारितवान्।

मुख्यमन्त्रिणा सह षड् मन्त्रिमण्डलसदस्या: प्रवेश-साहिब-सिंह: अशीष-सूद: , मनजिन्दर-सिंह-सिरसा, रवीन्द्र-इन्द्राज-सिंह, कपिल-मिश्र: पञ्कज-कुमार-सिंह: च शपथवचनं स्वीकृतवन्त:। भाजपादलस्य-सुषमा स्वराज इत्येतस्या:, काङ्ग्रेसदलस्य शीला-दीक्षित इत्यस्या: तथा च आम-आदमी-पार्टीति दलस्य आतिशी इत्येतस्या: अनन्तरं रेखा गुप्ता भाजपादलस्य द्वितीया तथा च दिल्ल्यां चतुर्थमुख्यमन्त्री सञ्जाता। सद्य: एव सम्पन्ने दिल्लीविधानसभा-निर्वाचने रेखा-गुप्ता इत्यसौ शालीमार-बाग-विधानसभासनात् विजयम् अधिगतवती। एषा द्विनवत्यधिक-नवदश-शततमे वर्षे दिल्ली-विश्वविद्यालयस्य-दौलत-राम-महाविद्यालये अखिल-भारतीय-विद्यार्थी-परिषदा स्व-राजनैतिक यात्राम् आरब्धवती। असौ षण्णवत्यधिक-नवदश-शततमे वर्षे दिल्ली-विश्वविद्यालय-छात्रसङ्घस्य अध्यक्षा रूपेण अपि चयनिता।

एषा दिल्ल्यां भाजपामहिलामोर्चा इत्येतस्या: महासचिवरूपेण अपि कार्यम् अकरोत्। तत्रैव मन्त्री कपिलमिश्र: अवदत् यत् अद्य ऐतिहासिक: दिवसो वर्तते तथा च भाजपा इत्येतत् दलं प्रधानमन्त्रिण: नरेन्द्रमोदिन: विकास नीती: दिल्ल्यां प्रवर्तयिष्यति।

------------------------------------------

रेखा गुप्ता

दिल्ल्या: मुख्यमन्त्री रेखा गुप्ता इत्यसै अद्य दिल्ली-सचिवालये कार्यभारं सम्भालितवती। मुख्यसचिव: धर्मेन्द्र-कुमार: अन्य-वरिष्ठाधिकारिण: च तस्या: स्वागतं कृतवन्त:। कार्यभारं सम्भालनानन्तरं-वार्ताहरान् सम्बोधयन्ती रेखा-गुप्ता इत्येषा उक्तवती यत् दिल्ली प्रशासनं विकसित-दिल्ल्या: दिशि निरन्तरं कार्यं करोति।

------------------------------------------

महाकुम्भ

सम्प्रति श्रूयन्तां महाकुम्भवार्ता:

प्रयागराजे प्रचल्यमानं महाकुम्भ-मेलकं न केवलम् आध्यात्मिकसभा-रूपेण विकसितम्, अपितु स्वच्छता-पर्यावरण-संरक्षणयो: केन्द्रितमेकं बृहद्क्रांतित्वेन अपि विकसितम्। अस्माकं वार्ताहरेण संसूचितं यत् भव्यकार्यक्रमावधौ नमामि-गङ्गे-उपक्रमस्य अन्तर्गतं -नद्या: शुद्धतां सुनिश्चेतुं तथा च अस्या: पवित्रतां रक्षितुं दश-उपचारसंयन्त्राणि सफलतया सक्रियाणि कृतानि। अत्याधुनिक-प्रौद्योगिक्या, रचनात्मकप्रदर्शनेन सूचनात्मकतत्वै: सह नमामि-गङ्गे-मण्डप इत्येतत्-सर्वेभ्य: वयोवर्गेभ्य: जनेभ्य: आकर्षणं वर्तते। पर्यटका: सर्वप्रथमं नैवविविधता-सुरङ्गेण गच्छन्ति, यत्र पक्षिणां कलरवं, गङ्गानद्या: तटे दृश्यमानां जैवविविधतां च प्रदर्श्यते। नमामि-गङ्गे-उपक्रम: महाकुम्भावधौ स्वच्छताया: जागरूकताया: च अभियानं अपि प्रचालयति। भक्तानां सौविध्याय नैका: अवकरकण्डोला: अपि स्थापिता: सन्ति। पञ्चदशशत-प्रशिक्षिता: गङ्गा-सेवादूता: वीथि-नाटकै:, भित्तिपत्राभियाने: जनसंवादै: च जागरूकतां प्रसारयन्ति।

संस्कृतवार्ता कक्षत:, ऋचा झा।

------------------------------------------

भारत-बाङ्गलादेशौ

भारत-बाङ्गलादेश-सीमा-समन्वय-सम्मेलनस्य पञ्चपञ्चाशतमं निदेशकस्तरीयं सम्मेलनमद्य दिल्ल्याम् सुसम्पन्नम्। सम्मेलनावधौ सीमापारापराधेषु सीम्नि वेष्टनं इत्यादिषु विषयेषु

उभयो: देशयो: मध्ये विस्तृता व्यापकी च चर्चा समनुष्ठिता। सम्मेलनान्तरं वार्ताहरान् संसूचयन् सीमा-सुरक्षा बलस्य निदेशक: दलजीतसिंहचौधरी उक्तवान् गतवर्षस्य अगस्तमासस्य पञ्चदिनाङ्कात् पश्चादेव भारत-बाङ्गलादेशयो: सीम्नि अवैधप्रवेशे न्यूनता समङ्किता। असौ अवदत् यत् सीम्नि अवैध-गतिविधीन् नियन्त्रयितुम् अत्याधुनिक-निरीक्षण-प्रणाल्या: स्थापनया सह निरीक्षण-तन्त्रं सुदृढं कृतमस्ति।

-----------------------------------------

## क्रिकेट्

पुरुष क्रिकेट्-क्रीडायां आई०सी०सी० चैम्पियन्स् ट्रॉफी इति स्पर्धायां भारत-बाङ्गलादेशयोर्मध्ये द्वन्द्वं प्रचलति। यत्र बाङ्गलादेशदलेन प्रथमं तावत् नवविंशत्यधिकद्विशतधावनाङ्कानाम् लक्ष्यं स्थापितं।

।। इति वार्ता:।।